# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-1) | **प्रश्नपत्रम् – ५** (New & Old) | **गुणाः** – ७० |
| **विषयः** – धर्मशास्त्रम् | **कोड- CE- 4-1-1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १९/१२/२०१८ | **सन्दर्भग्रन्थः**- मनुस्मृतिः (१-६ अध्यायाः) | |

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ एकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥

२. कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः ।
साध्यानां च गवां सूक्ष्मं यज्ञं चैव सनातनम् ॥

**प्र-२ एकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. मनुस्मृतेरनुगुणं जगदुत्पत्तिं वर्णयत ।

२. मनुस्मृतेः परिचयं सविस्तरं लिखत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ एकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणां युगह्रासानुरुपतः ॥

२. आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्त संपूर्णफलभाग्भवेत् ॥

**प्र-४ एकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. चतुर्णां वर्णानां कर्माणि लिखत ।

२. मनुस्मृतेः समाजे प्रभावं वर्णयत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ एकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रसमाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥

२. यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्च वा ॥

**प्र-६ एकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. वानप्रस्थधर्मान् विवेचयत ।

२. मनःपूतं समाचरेत् - इत्यस्य विवेचनं कुरुत ।

**प्र-७ एकस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. दूषितोऽपि चरेद्धर्मं यत्र यत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥

२. एककाल चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि पतिर्विषयेष्वपि सज्जति ॥

**॥ चतुर्थान्वितिः ॥**

**प्र-८ एकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. गृहस्थाश्रमस्य श्रेष्ठत्वं निरूपयत ।

२. षष्ठाध्यायस्य सारांशो लेख्यः ।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. मनुस्मृतौ कति अध्यायाः सन्ति?

२. मनुस्मृति - इत्यत्र कः समासः?

३. प्रथमाध्याये कति श्लोकाः सन्ति?

४. दशकं कस्य लक्षणम्?

५. कः परमो धर्मः ?

६. के अण्डजाः सन्ति?

७. कति युगानि सन्ति?

८. कति आश्रमाः सन्ति?

९. यति पात्राणि कानि सन्ति?

१०. किं फलं जलं स्वच्छीकरोति?

११. अस्तेयम् - इत्यस्य कोऽर्थः ?

१२. परमां गतिं कः प्राप्नोति?

१३. भृगुः केभ्यः कथयति?

१४. कूलम् - इत्यस्य कोऽर्थः ?

१५. षष्ठाध्याये श्लोकानां संख्या का?

--००--